**संस्कृत-वार्ता:**

**दिनाङ्क :- 30.09.2024**

**प्रात: - 06:55**

**प्रधानमन्त्री-मन की बात**

प्रधानमन्त्रिणा श्रीमोदिना ह्य: आकाशवाण्यां 'मन की बात' इति कार्यक्रमस्य चतुर्दशाधिकैक-शततमसंस्करणस्य सम्बोधनं विहितम्। स्वीय-मासिक-प्रसारणावधौ प्रवदता प्रधानमन्त्रिणा कथितं यत् 'मेक इन इंडिया' इति योजनाया: समारम्भकारणात् भारतं विनिर्माणक्षेत्रे महाशक्ति: समभवत्। तेनोदीरितं यदनेन अभियानेन निर्धना:, मध्यमवर्गीया:, सूक्ष्मलघुमध्यमोद्योगा: लाभान्विता: समभवन्। तथैव अनेन अभियानेन प्रत्येकवर्गस्य जनेभ्य: स्वप्रतिभा-प्रदर्शनार्थमपि अवसरा: प्रकल्पिता:। श्रीमोदिना जना: संप्रार्थिता: यत्ते आगामिषु उत्सवेषु मेक-इन-इंडिया इत्यस्य उत्पादान् क्रीणन्तु ।

तेनोदीरितं यत् सूचना-प्रसारणमन्त्रालयेन प्रतिभां रचनात्मकतां च संवर्धयितुं 'क्रिएट इन इंडिया' इति विषयान्तर्गतं पञ्चविंशति: समाह्वानानि समारब्धानि सन्ति।

**प्रधानमन्त्री-महाराष्ट्रपरियोजना**

प्रधानमन्त्री-नरेन्द्रमोदी ह्य: दृश्य-श्रव्यपरान्तर्जालीय-माध्यमेन भूयोऽपि द्विशताधिक-एकादशसहस्रकोटि-रूप्यकाणां विभिन्न-विकास-परियोजनानाम् आधारशिलां संस्थाप्य राष्ट्राय समर्पितवान्। प्रधानमन्त्रिणा जनपदन्यायालय-स्वरगेट इत्यनयो: मध्ये पुणे-मेट्रोरेल-खण्डस्यापि उद्घाटनं विहितम्।

**जम्मू-कश्मीर विधानसभा**

जम्मू-कश्मीरे विधानसभाया: तृतीयाय अन्तिमाय च चरणाय सर्वविध: सज्जता: सम्पादिता:। शान्तिपूर्णं घटनामुक्तं च मतदानं विधातुं सुदृढ-सुरक्षाव्यवस्था: अपि सुनिश्चिता: जाता:। श्व: एतस्मिन् तृतीये चरणे सप्त-जनपदानां चत्वारिंशद्-विधानसभासनेभ्य: मतदानं समनुष्ठास्यते। चत्वारिंशत् विधानसभाक्षेत्रेषु कश्मीरसम्भागस्य षोडशासनानि तत्रैव जम्मूसम्भागस्य चतुर्विंशति: आसनानि निहितानि सन्ति।

मतदानप्रक्रिया प्रात: सप्तवादनात् समारप्स्यते अपि च सायंकाले षड्-वादनं यावत् प्रचलिष्यति। ध्यातव्यम् अस्ति यत् प्रथमे चरणे एकषष्टि: प्रतिशतं द्वितीये चरणे च षड्पञ्चाशत् प्रतिशतं यावत् मतदानं समंकितम् । हरियाणां समेत्य मतगणना अक्टूबर मासस्य अष्टमे दिनाङ्के भविष्यति।

**प्रसारभारती-अध्यक्ष:**

प्रसारभारत्या: अध्यक्ष: नवनीत-सहगल: आकाशवाण्या प्रसारिते मनकीबात कार्यक्रमावधौ स्वीये सम्बोधनं प्रसारभारती-आकाशवाणी-दूरदर्शन-इत्येतेषां प्रशंसां कर्तुं प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति आभारं प्रकटितवान्।

**भारतीय निवेश:**

विदेशी-निवेशकै: भारतीय-समता-विपण्यां सप्तपञ्चाशत्सहस्त्र-कोटि-रूप्यकाणां निवेश: कृत:। य: सितम्बरमासात् पश्चादेव अधिकमस्ति। अयं निवेश: भारतीय-विपणिषु सततं त्रयाणां मासानां शुद्धनिवेशस्य पश्चादेव जात:।

**इजराइलाक्रमणम्**

इजराइलदेशेन हौथीलक्षितेषु स्थानेषु वायवीयाक्रमणानाम् एका श्रृङ्खला समारब्धा। इजराइलदेशीयेन सैन्यबलेन स्पष्टीकृतम् यत् ते विगते दिनद्वये इजराइलदेशं विरूध्य ईरान-सम्बद्ध-हौथी-आतङ्कवादिभि: साम्प्रतिके एव समये जातस्य प्रक्षेपास्त्राक्रमणस्य प्रत्युत्तराय आसन्।

**हॉकी-कनिष्ठवर्गीया**

अस्य वर्षस्य हॉकी-इत्येतस्या: भारत-कनिष्ठ-महिला-राष्ट्रिय-प्रतिस्पर्धाया: चतुर्दशतमं सस्करणम् अद्य झारखण्डस्य रांचीनगरे समारप्स्यते। अस्यै प्रतिस्पधायै षड्विंशति: दलानि पारस्परिक-सामुख्यं विधास्यन्ति। प्रागुपान्त्यचक्रम् अक्टूबरमासे सप्तमे दिनाङ्के अथ च उपान्त्यचक्रं नवमे दिनाङ्के क्रिडिष्यते।

**।। इति वार्ताः।।**